vedamnadam

# 2 - अथ द्वितीय दशकम्
## ॥ भगवद्रूप भक्तिमहत्त्वम् ॥

सूर्यस्पर्धिकिरीटमूर्ध्वतिलकप्रोद्भासि फालान्तरं
कारुण्याकुलनेत्रमार्द्रहसितोल्लासं सुनासापुटम् ।
गण्डोद्यन्मकराभकुण्डलयुगं कंठोज्ज्वलत्कौस्तुभं
त्वद्रूपं वनमाल्यहारपटलश्रीवत्सदीप्रं भजे ॥ (2.1)

केयूरांगदकंकणोत्तममहारत्नांगुलीयांकित-
श्रीमद्बाहुचतुष्कसंगतगदाशंखारिपंकेरुहाम् ।
कांचित्कांचनकांचिलांछितलसत्पीताम्बरालम्बिनीम्
आलम्बे विमलाम्बुजद्युतिपदां मूर्तिं तवार्तिच्छिदम् ॥ (2.2)

यत्त्रैलोक्यमहीयसोऽपि महितं सम्मोहनं मोहनात्
कान्तं कान्तिनिधानतोऽपि मधुरं माधुर्यधुर्यादपि ।
सौन्दर्योत्तरतोऽपि सुन्दरतरं त्वद्रूपमाश्चर्यतो-
ऽप्याश्चर्यं भुवने न कस्य कुतुकं पुष्णाति विष्णो! विभो! ॥ (2.3)

तत्तादृङ्मधुरात्मकं, तव वपुः सम्प्राप्य सम्पन्मयी
सा देवी परमौत्सुका चिरतरं नाऽस्ते स्वभक्तेष्वपि ।
तेनास्या बत कष्टमच्युत! विभो! त्वद्रूपमानोज्ञक-
प्रेमस्थैर्यमयादचापलबलाच्चापल्यवार्तोदभूत् ॥ (2.4)

लक्ष्मीस्तावकरामणीयकहृतैवेयं परेष्वस्थिरे-
त्यस्मिन्ननन्यदपि, प्रमाणमधुना वक्ष्यामि लक्ष्मीपते! ।
ये त्वद्ध्यानगुणानुकीर्तनरसासक्ता हि भक्ता जनाः
तेष्वेषा वसति स्थिरैव दयितप्रस्तावदत्तादरा ॥ (2.5)

एवंभूतमनोज्ञता नवसुधानिष्यन्दसन्दोहनं
त्वद्रूपं परचिद्रसायनमयं चेतोहरं शृण्वताम् ।
सद्यः प्रेरयते मतिं मदयते रोमांचयत्यंगकं
व्यासिंचत्यपि शीतबाष्पविसरैरानन्दमूर्छोद्भवैः ॥ (2.6)

एवंभूततया हि भक्त्यभिहितो योगस्सयोगद्वयात्
कर्मज्ञानमयाद् भृशोत्तमतरो योगीश्वरैर्गीयते ।
सौन्दर्यैकरसात्मके त्वयि खलु प्रेमप्रकर्षात्मिका
भक्तिर्निश्रममेव विश्वपुरुषैर्लभ्या रमावल्लभ! ॥ (2.7)

निष्कामं नियतस्वधर्मचरणं यत्कर्मयोगाभिधं
तद्दूरेत्यफलं यदौपनिषदज्ञानोपलभ्यं पुनः ।
तत्त्वव्यक्ततया सुदुर्गमतरं चित्तस्य तस्माद्विभो!
त्वत्प्रेमात्मकभक्तिरेव सततं स्वादीयसी श्रेयसी ॥ (2.8)

अत्यायासकराणि कर्मपटलान्याचर्य निर्यन्मला
बोधे भक्तिपथेऽथवाप्युचिततामायान्ति किं तावता ।
क्लिष्ट्वा तर्कपथे परं तव वपुर्ब्रह्माख्यमन्ये पुनः
चित्तार्द्रत्वमृते विचिन्त्य बहुभिस्सिध्यन्ति जन्मान्तरैः ॥ (2.9)

त्वद्भक्तिस्तु कथारसामृतझरीनिर्मज्जनेन स्वयं
सिद्ध्यंन्ती विमलप्रबोधपदवीमक्लेशतस्तन्वती ।
सद्यः सिद्धिकरी जयत्ययि विभो! सैवास्तु मे त्वत्पद-
प्रेमप्रौढिरसार्द्रता द्रुततरं वातालयाधीश्वर! ॥ (2.10)

॥ इति भगवद्रूप भक्तिमहत्त्वम् द्वितीय दशकम् संपूर्णम् ॥

vedam nadam